(Pages : 8) **S 1608**

# SSLC EXAMINATION, MARCH - 2021

## SANSKRIT

First Language - (Academic & Oriental) Paper I

Time : 1½ Hours Total Score : **40**

**निर्देशा:** -

- आदौ 20 निमेषा: समाश्वाससमय:। प्रश्नान् पठितुं, इच्छानुसारं चयितुं, उत्तराणि क्रमीकर्तुं च समयोऽयं उपयोक्तव्य:।
- प्रश्नस्य निर्देशान् सश्रद्धं पठित्वा, अवगत्य च उत्तराणि लेखनीयानि।
- प्रश्नानाम् अङ्का: तत्र तत्र दत्ता:। उत्तरलेखनाय समय: अङ्का: च परिगणनीया:।
- **1 - 31** प्रश्नेभ्य: **40** अङ्कलाभाय यथेच्छं कस्यापि प्रश्नस्य उत्तरलेखनाय अवसर: अस्ति।

**നിർദ്ദേശങ്ങൾ :**

- ആദ്യത്തെ **20** മിനിറ്റ് സമാശ്വാസസമയമാണ്. ഈ സമയം ചോദ്യങ്ങൾ വായിക്കുന്നതിനും ഇഷ്ടമുള്ള ചോദ്യങ്ങൾ തെരഞ്ഞെടുക്കുന്നതിനും ഉത്തരങ്ങൾ ആസൂത്രണം ചെയ്യുന്നതിനും ഉപയോഗിക്കേണ്ടതാണ്.
- ഓരോ ചോദ്യവുമായി ബന്ധപ്പെട്ട നിർദ്ദേശങ്ങൾ ശ്രദ്ധാപൂർവ്വം വായിച്ചു മനസ്സിലാക്കിയശേഷം ഉത്തരമെഴുതേണ്ടതാണ്.
- ഓരോ ചോദ്യത്തിനുമുള്ള സ്കോർ അതോടൊപ്പം നൽകിയിരിക്കുന്നു. ഉത്തരം എഴുതുമ്പോൾ സമയവും സ്കോറും പരിഗണിക്കേണ്ടതാണ്.
- **1** മുതൽ **31** വരെയുള്ള ചോദ്യങ്ങളിൽ നിന്നും **40** സ്കോർ ലഭിക്കത്തക്ക വിധം ഇഷ്ടമുള്ള ഏതു ചോദ്യങ്ങൾക്കും ഉത്തരമെഴുതാവുന്നതാണ്.

---

**1 - 8** प्रत्येकं प्रश्नस्य **एकैक:** अङ्क:। **Score**

(**1** മുതൽ **8** വരെയുള്ള ചോദ്യങ്ങൾക്ക് **ഒരു** സ്കോർ വീതമാണ്)

कोष्ठकात् समुचितम् उत्तरम् चित्वा लिखत।

1. लाभानां श्रेष्ठम् किम्? 1

(शास्त्रम्, आरोग्यम्, तृप्ति:, सामर्थ्यम्)

Score

2. सस्यविज्ञानस्य सूचना महाभारतस्य कस्मिन् पर्वणि दृश्यते ? 1

(वनपर्वणि, भीष्मपर्वणि, शान्तिपर्वणि, सभापर्वणि)

3. तञ्चावूर्देशाधिप: क: ? 1

(शरभोजी, त्यागराज:, स्वातितिरूनाल्, भोजराज:)

4. 'शङ्करदिग्विजयस्य' कर्ता क: ? 1

(कालिदास:, माधवविद्यारण्यस्वामी, श्रीहर्ष:, भारवि:)

5. सर्वविषहारिणी का ? 1

(हरिद्रा, आमलकी, निम्ब:, अशोक:)

6. 'अभिज्ञानशाकुन्तलस्य' कर्ता क: ? 1

(भास:, व्यास:, कालिदास:, भवभूति:)

7. शङ्कराय कुटुम्बिनी किम् अदात् ? 1

(धनम्, धान्यम्, अन्नम्, आमलकम्)

8. पि.सि. देवस्या महोदयेन विरचित: ग्रन्थ: ? 1

(नवभारतम्, क्रिस्तुभागवतम्, विश्वभानु:, केरलोदय:)

**9 - 17 प्रत्येकं प्रश्नस्य द्वौ अङ्कौ।**

**(9 മുതൽ 17 വരെയുള്ള ഓരോ ചോദ്യത്തിനും രണ്ട് സ്കോർ വീതമാണ്)**

9. 'जीविते सुखस्य दु:खस्य च कारणं स्वकर्म एव' इत्याशयप्रतिपादकं श्लोकं चित्वा लिखत। 2

(क) ईर्ष्याभयक्रोधसमन्वितेन
लुब्धेन रूग्दैन्यनिपीडितेन।
विद्वेषयुक्तेन च सेव्यमानम्
अन्नं न सम्यक् परिपाकमेति॥

(ख) आत्मानमेव मन्येत
कर्तारं सुखदु:खयो:।
तस्माच्छ्रेयस्करं मार्गं
प्रतिपद्येत न त्रसेत्॥

Score

10. उदाहरणानुसारं पट्टिकां लिखत। 2

[व्याकरणम्, ऋग्वेदः, निरूक्तम्, सामवेदः]

| | वेदाः | वेदाङ्गानि |
|---|---|---|
| उदा :- | ऋग्वेदः। | निरूक्तम्। |
| | - - - - - | - - - - - |

11. अधोदत्तं श्लोकं पठित्वा उचितमाशयं चित्वा लिखत। 2

परिश्रमो मिताहारो
भूगतावश्विनीसुतौ।
तावनादृत्य नैवाहं
वैद्यमन्यं समाश्रये॥

(क) भोजनावसरे ईर्ष्यादिभावनां विहाय स्वस्थाः भवेयुः।

(ख) व्यायामः मिताहारः च आरोग्याय उत्तमः भवति।

(ग) स्वकर्मफलं स्वशरीरेण अनुभूयते।

12. उदाहरणानुसारं शतृशानजन्तरूपाणि विविच्य पट्टिकां पूरयत। 2

[नुद्यमानः, पठन्, पचन्, कम्पमानः]

| | शत्रन्तरूपाणि। | शानजन्तरूपाणि। |
|---|---|---|
| उदा :- | पचन् | कम्पमानः |
| | - - - - - | - - - - - |

13. उदाहरणानुसारं 'यद्यपि – तथापि' उपयुज्य वाक्यं परिवर्तयत। 2

उदा :- जनाः चित्रशालाम् अगच्छन्।
तत्र वैद्युतिः नासीत्।

यद्यपि जनाः चित्रशालाम् अगच्छन् तथापि तत्र वैद्युतिः नासीत्।

(क) वर्षाकालः समागतः। वृष्टिः नास्ति।

- - - - - - - - - - - - - - - -

Score

14. सस्यानाम् औषधगुणं विविच्य पट्टिकायां योजयत। 2

उदा :-

| | |
|---|---|
| ऊर्जप्रदायिनी | आमलकी |
| व्रणनाशकः | - - - - - |
| विषहारिणी | - - - - - |

निम्बः
तुलसी
आमलकी

15. श्लोकं पठित्वा गद्यक्रमं लिखत। 2

स हि जातु गुरोः कुले वसन्

सवयोभिः सह भैक्ष्यलिप्सया।

भगवन् भवनं द्विजन्मनो

धनहीनस्य विवेश कस्यचित्॥

गद्यक्रमः - गुरोः कुले _____ भैक्ष्यलिप्सया _____ सह जातु कस्यचित् _____ द्विजन्मनः _____ विवेश हि।

16. उदाहरणानुसारं लिखत। 2

उदा :- सम्पन्ने + अस्मिन् - सम्पन्नेऽस्मिन्।

(क) काव्ये + अस्मिन् - __________।

उदा :- तुष्टिरुत्तमा - तुष्टिः + उत्तमा।

(ख) तृप्तिरुत्तमा - __________ + __________।

17. उदाहरणानुसारं लिखत। 2

उदा :- देवाधिपः - देवानाम् अधिपः।

(क) धनाधिपः __________।

उदा :- पुरुषेषु उत्तमः। - पुरुषोत्तमः।

(ख) नरेषु उत्तमः। __________।

Score

**18 - 21** प्रत्येकं प्रश्नस्य **त्रयः** अङ्काः।

(**18** മുതൽ **21** വരെയുള്ള ചോദ്യങ്ങൾക്ക് **മൂന്ന്** സ്കോർ വീതമാണ്)

**18.** कोष्ठकात् क्त्वान्त-ल्यबन्त-तुमुन्नन्त पदानि चित्वा लिखत। 3

[प्रणम्य, गन्तुम्, श्रुत्वा, विलोक्य, पठितुम्, दृष्ट्वा]

| | क्त्वान्तं | ल्यबन्तं | तुमुन्नन्तं |
|---|---|---|---|
| उदा :- | दृष्ट्वा | प्रणम्य | गन्तुम् |
| | - - - - - | - - - - - | - - - - - |

**19.** समानार्थकपदानि चित्वा लिखत। 3

(क) कृषीवलः ...............

(ख) तनयः ...............

(ग) आखण्डलः ...............

| |
|---|
| पुत्रः |
| इन्द्रः |
| कृषकः |

**20.** उदाहरणानुसारं पट्टिकां लिखत। 3

[कर्कटी, कदली, कूश्माण्डः, पूगः, व्रीहिः, नालिकेरः]

| | वृक्षः | वीरूत् | ओषधिः |
|---|---|---|---|
| उदा :- | पूगः | कर्कटी | कदली |
| | - - - - - | - - - - - | - - - - - |

**21.** उदाहरणानुसारं पट्टिकां लिखत। 3

[पठति, चलतु, अवदत्, अपठत्, वदति, अचलत्, पठतु, वदतु]

| | लट् | लङ् | लोट् |
|---|---|---|---|
| उदा :- | पठति | अपठत् | पठतु |
| | चलति | - - - - - | चलतु |
| | - - - - - | अवदत् | - - - - - |

Score

**22 - 29** प्रत्येकं प्रश्नस्य **चत्वारः** अङ्काः।

(**22** മുതൽ **29** വരെയുള്ള ചോദ്യങ്ങൾക്ക് **നാല്** സ്കോർ വീതമാണ്)

**22.** सम्भाषणांशान् पूरयत। 4

व्यासमहर्षिः - नमस्ते धृतराष्ट्रमहाराज!

धृतराष्ट्रः - __________ व्यासमहर्षे।

व्यासमहर्षिः - एकं कार्यं वक्तुमिच्छामि।

धृतराष्ट्रः - किं __________ वक्तुं इच्छसि?

व्यासमहर्षिः - पाण्डवान् अधिकृत्य __________ इच्छामि।

धृतराष्ट्रः - तेषां किम् अभवत्?

व्यासमहर्षिः - __________ अवस्था शोचनीया भवति।

दुर्योधनः तान् अतिकठिनं द्रुहयति।

**23.** सूचनाः उपयुज्य वृक्षायुर्वेदम् अधिकृत्य लघुपन्यासं लिखत। 4

सूचनाः - दशकूपसमा _ _ _ _ _ ऋग्वेदः _ _ _ _ _ महाभारतम् _ _ _ _ _ वृक्षायुर्वेदः _ _ _ _ _ त्रयोदशाध्यायः _ _ _ _ _ भूमिनिरूपणम् _ _ _ _ _ रोगः _ _ _ _ _ चिकित्सा।

**24.** उदाहरणानुसारं पट्टिकां पूरयत। 4

| | कर्ता | कृतिः | विभागः |
|---|---|---|---|
| उदा :- | कालिदासः | कुमारसम्भवम् | महाकाव्यम् |
| | - - - - - | चरकसंहिता | शास्त्रम् |
| | सुरपालः | - - - - - | शास्त्रम् |
| | माधवविद्यारण्यस्वामी | शङ्करदिग्विजयम् | - - - - - |
| | - - - - - | महाभारतम् | इतिहासः |

**25.** श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत। 4

तमवोचत तत्र सादरं
वटुवर्यं गृहिणः कुटुम्बिनी।
कृतिनो हि भवादृशेषु ये
वरिवस्यां प्रतिपादयन्ति ते॥

(क) कुटुम्बिनी कम् अवोचत?

(ख) 'तमवोचत' इत्यस्य पदच्छेदं लिखत।

(ग) कुटुम्बिनी वटुवर्यं कथम् अवोचत?

(घ) जनाः भवादृशेषु कां प्रतिपादयन्ति?

Score

26. सूचनाः उपयुज्य व्यायामस्य प्राधान्यमधिकृत्य लघूपन्यासं लिखत। 4

सूचनाः - परिश्रमः _____ अश्वनीसुतौ _____ शनैः व्यायामः _____ आहारशीलः आरोग्यसुस्थितिः।

27. कोष्ठकात् पदानि चित्वा पट्टिकां लिखत। 4

[ओषधिः, व्यक्तपुष्पः, वनस्पतिः, प्रतानैः प्रसारिता]

| विभागः | लक्षणम् |
|---|---|
| - - - - - | अव्यक्तपुष्पः। |
| वृक्षः | - - - - - |
| वीरूत् | - - - - - |
| - - - - - | फलपाकान्ता। |

28. सूचनाः उपयुज्य जीवनचरितं लिखत। 4

नाम - मोहन्दास् करंचन्द् गान्धी

जन्म - 1869 ओक्टोबर् 2, गुजरात्, पोर्बन्दर्

पिता - करंचन्द् गान्धी

माता - पुत्तलीबायी

प्रशस्तिः - भारतस्य राष्ट्रपिता,
स्वातन्त्रसमरनायकः।

मृत्युः - 1948 जनुवरि 30 नवदिल्ली

29. खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत। 4

अभिज्ञानशाकुन्तलं विश्वप्रसिद्धं नाटकं भवति। प्रकृतिस्नेहस्य उत्तमदृष्टान्तः अयं ग्रन्थः। शाकुन्तले चतुर्थः अङ्कः प्रशस्तः भवति। तत्र नायकः दुष्यन्तः नायिका च शकुन्तला भवति। अस्मिन् नाटके मुख्यो रसः श्रृङ्गारः भवति।

(क) शाकुन्तले मुख्यः रसः कः?

(ख) कस्य उत्तमदृष्टान्तः अभिज्ञानशाकुन्तलम्?

(ग) शाकुन्तले प्रशस्तः अङ्कः कः?

(घ) नाटकस्य नायकः कः?

Score

**30 - 31** प्रत्येकं प्रश्नस्य **पञ्च** अङ्काः।

(**30** മുതൽ **31** വരെയുള്ള ചോദ്യങ്ങൾക്ക് **അഞ്ച്** സ്കോർ വീതമാണ്)

**30.** प्रादेशिकभाषया विवर्तयत। **5**

एकदा शङ्करः सतीर्थ्यैः सह भिक्षार्थं अटति स्म। सः एकस्य ब्राह्मणस्य गृहं प्रविवेश। तत्रत्य गृहिणी शुष्कम् आमलकं ददाति। तदा तस्याः दारिद्र्यं अवगच्छति। श्रीशङ्करः दारिद्र्यनिवारणाय लक्ष्मीदेवीं प्रार्थयत।

**31.** प्रादेशिकभाषया विवर्तयत। **5**

कालिदासविरचितं महाकाव्यं भवति कुमारसम्भवम्। काव्यमिदं पञ्चमहाकाव्येषु अन्तर्भवति। तत्र षष्ठसर्गे महर्षिः अङ्गिरः हिमालयं वदति ''पार्वतीं शिवाय ददातु'' इति। तत् श्रुत्वा पार्वती लज्जावती तिष्ठति। लज्जायुक्ता पार्वती अतिसुन्दरी भवति।

**-o0o-**